# shrIgajendramokShaH

# શ્રીગજેન્દ્રમોક્ષઃ

## Document Information

Text title : gajendramokShaH

File name : gajendramokShaH.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : ShrimadbhagavataM skandha 8, adhyAya 3

Acknowledge-Permission: Shri Tripursundari Ved Gurukulam, Sahibabad (Ghaziabad), UP

Latest update : August 3, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 3, 2020

*sanskritdocuments.org*

# શ્રીગજેન્દ્રમોક્ષઃ

શ્રીશુક ઉવાચ
એવં વ્યવસિતો બુદ્ધ્યા સમાધાય મનોહૃદિ ।
જજાપ પરમં જાપ્યં પ્રાગ્જન્મન્યનુશિક્ષિતમ્ ॥ ૧॥

ગજેન્દ્ર ઉવાચ
નમો ભગવતે તસ્મૈ યત એતચ્ચિદાત્મકમ્ ।
પુરુષાયાદિબીજાય પરેશાયાભિધીમહિ ॥ ૨॥

યસ્મિન્નિદં યતશ્ચેદં યેનેદં ય ઇદં સ્વયમ્ ।
યોઽસ્માત્પરસ્માચ્ચ પરસ્તં પ્રપદ્યે સ્વયમ્ભુવમ્ ॥ ૩॥

યઃ સ્વાત્મનીદં નિજમાયયાર્પિતં
ક્વચિદ્વિભાતં ક્વ ચ તત્તિરોહિતમ્ ।
અવિદ્ધદૃક્ સાક્ષ્યુભયં તદીક્ષતે
સ આત્મમૂલોઽવતુ માં પરાત્પરઃ ॥ ૪॥

કાલેન પઞ્ચત્વમિતેષુ કૃત્સ્નશો
લોકેષુ પાલેષુ ચ સર્વહેતુષુ ।
તમસ્તદાઽઽસીદ્ગહનં ગભીરં
યસ્તસ્ય પારેઽભિવિરાજતે વિભુઃ ॥ ૫॥

ન યસ્યદેવા ઋષયઃપદં વિદુ-
ર્જન્તુઃ પુનઃ કોઽર્હતિ ગન્તુમીરિતુમ્ ।
યથા નટસ્યાકૃતિભિર્વિચેષ્ટતો
દુરત્યયાનુક્રમણઃ સ માવતુ ॥ ૬॥

દિદૃક્ષવો યસ્ય પદં સુમઙ્ગલં
વિમુક્ત સઙ્ગા મુનયઃ સુસાધવઃ ।
ચરન્ત્યલોકવ્રતમવ્રણં વને

ભૂતાત્મભૂતાઃ સુહૃદઃ સ મે ગતિઃ ॥ ૭॥

ન વિદ્યતે યસ્ય ચ જન્મ કર્મ વા
ન નામરૂપે ગુણદોષ એવ વા ।
તથાપિ લોકાપ્યયસમ્ભવાય યઃ
સ્વમાયયા તાન્યનુકાલમૃચ્છતિ ॥ ૮॥

તસ્મૈ નમઃ પરેશાય બ્રહ્મણેઽનન્તશક્તયે ।
અરૂપાયોરુરૂપાય નમ આશ્ચર્યકર્મણે ॥ ૯॥

નમ આત્મપ્રદીપાય સાક્ષિણે પરમાત્મને ।
નમો ગિરાં વિદૂરાય મનસશ્ચેતસામપિ ॥ ૧૦॥

સત્ત્વેન પ્રતિલભ્યાય નૈષ્કર્મ્યેણ વિપશ્ચિતા ।
નમઃ કૈવલ્યનાથાય નિર્વાણસુખસંવિદે ॥ ૧૧॥

નમઃ શાન્તાય ઘોરાય મૂઢાય ગુણધર્મિણે ।
નિર્વિશેષાય સામ્યાય નમો જ્ઞાનઘનાય ચ ॥ ૧૨॥

ક્ષેત્રજ્ઞાય નમસ્તુભ્યં સર્વાધ્યક્ષાય સાક્ષિણે ।
પુરુષાયાત્મમૂલાય મૂલપ્રકૃતયે નમઃ ॥ ૧૩॥

સર્વેન્દ્રિયગુણદ્રષ્ટે સર્વ પ્રત્યય હેતવે ।
અસતાચ્છાયયોક્તાય સદાભાસાય તે નમઃ ॥ ૧૪॥

નમો નમસ્તેઽખિલકારણાય
નિષ્કારણાયાદ્ભુતકારણાય ।
સર્વાગમામ્નાયમહાર્ણવાય
નમોઽપવર્ગાય પરાયણાય ॥ ૧૫॥

ગુણારણિચ્છન્નચિદૂષ્મપાય
તત્ક્ષોભવિસ્ફૂર્જિતમાનસાય ।
નૈષ્કર્મ્યભાવેન વિવર્જિતાગમ-
સ્વયંપ્રકાશાય નમસ્કરોમિ ॥ ૧૬॥

માદૃક્પ્રપન્નપશુપાશવિમોક્ષણાય
મુક્તાય ભૂરિકરુણાય નમોઽલયાય ॥

સ્વાંશેન સર્વતનુભૃન્મનસિ પ્રતીત-

પ્રત્યગ્દૃશે ભગવતે બૃહતે નમસ્તે ॥ ૧૭॥

આત્માઽઽત્મજાપ્તગૃહવિત્તજનેષુ સક્તૈ-
ર્દુષ્પ્રાપણાય ગુણસઙ્ગવિવર્જિતાય ।
મુક્તાત્મભિઃ સ્વહૃદયે પરિભાવિતાય
જ્ઞાનાત્મને ભગવતે નમ ઈશ્વરાય ॥ ૧૮॥

યં ધર્મકામાર્થવિમુક્તિકામા
ભજન્ત ઇષ્ટાં ગતિમાપ્નુવન્તિ ।
કિં ત્વાશિષો રાત્યપિ દેહમવ્યયં
કરોતુ મેઽદભ્રદયો વિમોક્ષણમ્ ॥ ૧૯॥

એકાન્તિનો યસ્ય ન કઞ્ચનાર્થં
વાઞ્છન્તિ યે વૈ ભગવત્પ્રપન્નાઃ ।
અત્યદ્ભુતં તચ્ચરિતં સુમઙ્ગલં
ગાયન્ત આનન્દસમુદ્રમગ્નાઃ ॥ ૨૦॥

તમક્ષરમ્બ્રહ્મ પરં પરેશ-
મવ્યક્તમાધ્યાત્મિકયોગગમ્યમ્ ।
અતીન્દ્રિયં સૂક્ષ્મમિવાતિદૂર-
મનન્તમાદ્યં પરિપૂર્ણમીડે ॥ ૨૧॥

યસ્ય બ્રહ્માદયો દેવા વેદા લોકાશ્ચરાચરાઃ ।
નામરૂપવિભેદેન ફલ્ગ્વ્યા ચ કલયા કૃતાઃ ॥ ૨૨॥

યથાર્ચિષોઽગ્નેઃ સવિતુર્ગભસ્તયો
નિર્યાન્તિ સંયાન્ત્યસકૃત્સ્વરોચિષઃ ।
તથા યતોઽયં ગુણસમ્પ્રવાહો
બુદ્ધિર્મનઃ ખાનિ શરીરસર્ગાઃ ॥ ૨૩॥

સ વૈ ન દેવાસુરમર્ત્યતિર્યઙ્
ન સ્ત્રી ન ષણ્ડો ન પુમાન્ન જન્તુઃ ।
નાયં ગુણઃ કર્મ ન સન્ન ચાસન્
નિષેધશેષો જયતાદશેષઃ ॥ ૨૪॥

જિજીવિષે નાહમિહામુયા કિ-
મન્તર્બહિશ્ચાવૃતયેભયોન્યા ।

ઇચ્છામિ કાલેન ન યસ્ય વિપ્લવ-
સ્તસ્યાત્મલોકાવરણસ્ય મોક્ષમ્ ॥ ૨૫॥

સોઽહં વિશ્વસૃજં વિશ્વમવિશ્વં વિશ્વવેદસમ્ ।
વિશ્વાત્માનમજં બ્રહ્મ પ્રણતોઽસ્મિ પરં પદમ્ ॥ ૨૬॥

યોગરન્ધિતકર્માણો હૃદિ યોગવિભાવિતે ।
યોગિનો યં પ્રપશ્યન્તિ યોગેશં તં નતોઽસ્મ્યહમ્ ॥ ૨૭॥

નમો નમસ્તુભ્યમસહ્ય વેગ-
શક્તિત્રયાયાખિલધીગુણાય ।
પ્રપન્નપાલાય દુરન્તશક્તયે
કદિન્દ્રિયાણામનવાપ્યવર્ત્મને ॥ ૨૮॥

નાયં વેદ સ્વમાત્માનં યચ્છક્ત્યાહન્ધિયા હતમ્ ।
તં દુરત્યયમાહાત્મ્યં ભગવન્તમિતોઽસ્મ્યહમ્ ॥ ૨૯॥

શ્રીશુક ઉવાચ
એવં ગજેન્દ્રમુપવર્ણિતનિર્વિશેષં
બ્રહ્માદયો વિવિધલિઙ્ગભિદાભિમાનાઃ ।
નૈતે યદોપસસૃપુર્નિખિલાત્મકત્વાત્
તત્રાખિલામરમયો હરિરાવિરાસીત્ ॥ ૩૦॥

તં તદ્વદાર્ત્તમુપલભ્ય જગન્નિવાસઃ
સ્તોત્રં નિશમ્ય દિવિજૈઃ સહ સંસ્તુવભિઃ ।
છન્દોમયેન ગરુડેન સમુહ્યમાન-
શ્ચક્રાયુધોઽભ્યગમદાશુ યતો ગજેન્દ્રઃ ॥ ૩૧॥

સોઽન્તસ્સરસ્યુરુબલેન ગૃહીત આર્ત્તો
દૃષ્ટ્વા ગરુત્મતિ હરિં ખ ઉપાત્તચક્રમ્ ।
ઉત્ક્ષિપ્ય સામ્બુજકરં ગિરમાહ કૃચ્છ્રા-
ન્નારાયણાખિલગુરો ભગવન્ નમસ્તે ॥ ૩૨॥

તં વીક્ષ્ય પીડિતમજઃ સહસાવતીર્ય
સગ્રાહમાશુ સરસઃ કૃપયોજ્જહાર ।
ગ્રાહાદ્વિપાટિતમુખાદરિણા ગજેન્દ્રં
સમ્પશ્યતાં હરિરમૂમુચદુસ્ત્રિયાણામ્ ॥ ૩૩॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરરાણે સંહિતાયામષ્ટસ્કન્ધે
શ્રીગજેન્દ્રમોક્ષણં નામ તૃતીયોઽધ્યાયઃ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIgajendramokShaH*

pdf was typeset on August 3, 2020

Please send corrections to *sanskrit@cheerful.com*